31. पञ्चगव्यप्राशनविधिः-
पत्र. 5. सं०

1335

देवीचरण शर्मा

9"x5"

अथ पञ्चगव्यप्राशनविधिः प. ४

॥१॥

श्रीगणेशायनमः अथ पञ्चगव्यविधिः तत्राऽऽचमनं पवित्र धारणं
शिखाबंधनं विष्णोस्मरणं कुर्य्यात् अथ द्वादशाङ्गुल चतुरस्रां वेदीं निर्माय
अग्निस्थापनंकुर्य्यात् तत्र शुद्धायां भूमौ दर्भैः परिसमूहनम् गोमयोद
केनोल्लेपनम् खादिरेणस्रुवेणोल्लेखनम् हस्तेनोद्धरणम् उदकेनाभ्युक्षणम्
एतान् पञ्चभूसंस्कारान् कृत्वा लौकिकाग्निं स्थापयेत ॐ अग्निंदूतं पुरोदधे
इति शाण्डिल्यगोत्रपावकनामअग्ने इहागच्छ इहतिष्ठ तत्रअग्न्यानयन
पात्रेषु जलं गंधादिकं क्षिपेत् अथाग्निमुखंकृत्वाग्निंपूजयेत ॐ भूर्भुवःस्वः
अग्नयेनमः इतिमंत्रेण जलगंधादिना पूजयेत प्रणम्य ततोयजमानः ताम्रपा
त्रे मृण्मय पात्रेवा एतान् पञ्चगव्य पदार्थान् [illegible] यथाक्रमेण निधापयेत्॥ तत्र
गोलक्षणं॥ रुग्णा वृद्धाऽप्रसूताच वंध्या सन्धिन्यमेध्यभुक्। मृतवत्साच नैता
सां ग्राह्यं मूत्रं सकृत्सयः॥ तत्र स्कंदे॥ गोमूत्रंकृष्णवर्णायाः श्वेतायाश्चैवगोमय

क्रव्यादंशं निरस्य ५

मनुरिक्षुकार

॥१॥

कूष्मांडैर्जुहुयान्मंत्रैः पञ्चगव्यंहुताशने सव्याहृत्या च गायत्र्या तथैव प्रणवेन तु १

म पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव च ॥ मूत्रमेक पलं ग्राह्य मङ्गुष्ठार्द्धं तु गोमयम् । क्षीरं सप्त पलं ग्राह्यं दधि त्रिपलमुच्यते घृतमेकपलं ग्रेह्य पलमेकं कुशोदकम् ॥ गायत्र्याचैव गोमूत्रं गंधद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥ तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम् । पञ्चगव्य मृचा पूतं स्थापयेदग्नि संनिधौ ॥ आपो हिष्ठेति चालोड्य मानस्तोकेति मंथयेत् । सप्तावारास्तु ये दर्भाः अच्छिन्नाग्राः शुक त्विषः ॥ एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि । इरावती इदं विष्णु मानस्तोकेति शंवती ॥ एतासिश्चैव होतव्यं पञ्चगव्यं यथाविधि हुतशेषं पिवेद्द्विजैः । तत्र प्रथमं कृष्णवर्णायाः गोमूत्रं एकपलं पूर्वोक्त ताम्रादि पात्रे निक्षिपेत् तत्र मंत्रः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यमिति गायत्री मंत्रेण । श्वेतवर्णायाः गोमयं अङ्गुष्ठार्द्धं पात्रे निक्षिपेत् अनेन मंत्रेण ॥ ॐ गंधद्वारां दुराधर्षां नित्य

इति बृहत्पाराशरधर्मशास्त्रे ८

चौसठिमासेका एकपल यागम्विनाम लोठ

॥२॥ पुष्टांकरीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम ॥२॥ पुनः ताम्रवर्णा
याः गोक्षीरं सप्तपलं पात्रे निक्षिपेदनेन मंत्रेण ॐ आप्यायस्व समेतु ते विश्वतः
सोम वृषन्यम भवावाजस्य संगथे इति ॥३॥ पुनः रक्तवर्णायाः गोर्दधि त्रिपलमि
त्यनेन मंत्रेण पात्रे निक्षेपेत् ॥ ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः
सुरभिनो मुखाकरत् प्रणआयुꣳषितारिषत् ॥४॥ पुनः कपिलायाः घृतं एक
पलं ग्राह्यमनेन मंत्रेण पात्रे विनिक्षिपेत् ॥ ॐ तेजोसि शुक्रमस्यमृतमसि धा स्रो १
मनामासि प्रियम् देवानामनाधृष्टं देवयजनमसि ॥ गायत्र्येकपदी द्विपदी त्रिप
दी चतुष्पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो
मप्रापत् इति ॥ तत्र यदा एतादृशाम्वर्णाऽभावे तदा सर्वं कपिलायाः गव्यं ग्राह्यम् ॥
अथ तस्मिन् पञ्चगव्यपात्रे कुशोदकं निक्षिपेत् अनेन मंत्रेण ॥ ॐ देवस्य त्वा सवितुः
प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥६॥ ततः सप्तदर्भैः पञ्चगव्यमालोड्य
तत्र मंत्रः ॐ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन महेरणाय चक्षसे यो वः शिव ॥२॥

तमोरसः तस्यभाजयतेहनः उसतीरिव मातरः तस्मारङ्गमामवः यस्यक्षया
यजिन्वथ आपोजनयथाचनः॥ पुनः मानस्तोकेति मंत्रेण तैः दर्भेण पञ्चगव्यं
मंथनं कुर्यात । ॐ मानस्तोके तनये मान आयुषिमानो गोषु मानो अश्वेषु रीरि
षः मानो वीरान्रुद्र भामिनो वधीर हविष्मंतः सदमित्वा हवामहे॥ पुनः त्रिभिः
गायत्री मंत्रेण पञ्चगव्य मभि मंत्र्य विष्णुं पञ्चगव्य मध्ये संस्नापयेत॥ यथा
विष्णुं संस्नापयेद्भक्त्या पञ्चगव्येन मार्जयेत इति अथस्नान मंत्रः ॐ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढमस्य पांसुरे॥ ततः शुद्ध जलेन संस्नापयेत ॐ
५८ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद स भूमिं सर्वतस्पृत्वा त्यतिष्ठ दशांगु
लम् इत्यादिभिः चंदनाक्षत धूप दीप नैवेद्यादिभिः संपूज्य प्रणम्य अथ पञ्चगव्य
मग्निसमीपे स्थापयेत ततः अछिन्नाग्रैः हरितैः सप्त दर्भ कुशैः पञ्चगव्यमादा
य कूष्मांडी मंत्रेण ऽ गैनो जुहोति॥ अथ कूष्मांडी मंत्रः यथा ॐ यद्देवा देवहेडनं
देवासश्चकृमा वयं अग्निर्मा तस्मादेनसो विश्वान्मुंचत्वंहसः॥१॥ ॐ यदि

स्वाहा इदमग्नये १२

आलोड्य प्रणवे नैव निर्मथ्य प्रणवेन तु १

स्वाहा इदं वायवे २

॥३॥ दिवा यदि नक्तमेनाꣳसि चकृमा वयं वायुर्मा तस्मादेनसो विश्वान्मुंचत्वꣳहसः ॥२॥ ॐ यदि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा वयं सूर्य्यो मा तस्मादेनसो

स्वाहा इदꣳ सूर्याय ३ विश्वान्मुंचत्वꣳहसः ॥३॥ ततः पञ्चभिः गायत्री मंत्रेण पञ्चगव्यं जुहोति ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्ग्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ स्वाहा ॥५॥ ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या व्यस्कभ्नारोदसी विष्णवे ते धार्य्य पृथिवीमभितो मयूषैः स्वाहा ॥१॥ ॐ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः मानो वीरान्नुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे स्वाहा ॥१॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पाꣳसुरे स्वाहा ॥१॥ इति हवनम् ॥ ततः हुतशेषं पिबेद्द्विजः तत्र क्रमः उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ॥ मध्यमेन पलाशस्य तत्पत्रेण पिबेद्द्विजाः द्वितीयं पद्मपत्रेण ब्रह्मपत्रेण चापरं ॥ चतुर्थं ताम्रपात्रेण तत्पिबेद्व्रतकृन्नरः ॥ यत्त्वगस्थिगतं पापं ॥३॥

निष्पन्नं पञ्चगव्यं च पात्रेषु क्रमतः पिबेत् ५ ॥१॥

पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ॥१॥

दहेत्तिष्ठति देहिनाम् । ब्रह्मकूर्चं दहेत्सर्वं प्रदीप्तोग्निरिवेन्धनम् ॥१॥ एवं
माहात्म्यं पठित्वा ॐकार मुच्चार्य्य पूर्वोक्तपलासमध्यपात्रे पञ्चगव्यमादा
य दक्षिणकरे गृहीत्वा पुनः ओंकार स्मरणं कृत्वा पञ्चगव्यं प्राशयेत् पश्चा
दाचम्य एवं यज्ञाधिष्ठित सर्वे ब्राह्मणाः पुत्रादि कुटुम्बादयः प्राश्यते ततः म
ण्डल मध्ये आसादित सम्भारान् पञ्चगव्येन संशोध्य गृहेष्वाऽभिषिंचेत् ॥
पश्चात् गोदानं कृत्वा तद्यथा ओं अद्येहेत्यादि श्रुतिस्मृति पुराणोक्त शुभ पुण्य प्राशन १
फल प्राप्तिकामः अमुक गोत्र अमुक शर्म्मा कृतेन पञ्चगव्यैर्विधि कर्मणिय
न्यूनं तत्सम्पूर्णता सिद्ध्यर्थं इमां गां तन्निष्क्रयभूतां रजतैकमुद्राप कल्पितां
चन्द्र दैवतां अमुकगोत्राय अमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ कृतेन
तद्योनिष्क्रयदान सांगता सिद्ध्यर्थं यथा परिमितं ताम्रमयं द्रव्यं यथानाम
गोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे अथाऽभिषेक तिलक सांगता मंत्र पाठः
इति पञ्चगव्यप्राशनविधिः वृहत्पाराशर धर्म्मशास्त्रे ॥ ब्रह्मकूर्चं प्रवक्ष्यामि =

॥४॥ व्रतानामुत्तमंव्रतं कृतेन येनमुच्यंते मनुष्याः सर्वकिल्विषैः ॥१॥ पञ्चगव्यंपि
वेन विप्रो विभ्रयाच्छिर शातृप: वैश्यं भिषिंचंनुशूद्र स्यैव निरीक्षणम् ॥२॥
व्रह्मकूर्चमिदं प्रोक्तं व्रतं पञ्चदिनात्मकम् ॥ पञ्चगव्यंच संप्राश्य पञ्चरात्रोपवास
कृत ॥३॥ नत्तेनवासमश्नीयात यवच्छकमादि तानिच। पञ्चाह्निकं पारणकं व्रत
स्यास्य प्रकीर्तितम् ॥४॥ निर्दहेत्सर्वपापानि व्रह्मकूर्चमिदं व्रतम् ॥ गोमूत्रं गो
मयंक्षीरं दधिसर्पिकुशोदकं। निर्दिष्टं पञ्चगव्यंतु पवित्रं पाप शोधनम् ॥५॥
२०७ वरुणश्चैवगोमूत्रे गोमयेहव्यवाहनः। दधिवायुः समुद्दिष्टः सोमः क्षीरे घृते रविः
इतिवृहत्पराशर धर्मशास्त्रे पञ्चगव्य प्राशन व्रह्मकूर्च व्रतविधिः संपूर्णम् ॥
शुभमस्तु ॥ लि॰ पं॰ देवीचरण शर्म्मा स्था॰ टढा सं॰ १९९३ ॥ द्वि॰ भाद्रकृष्ण
क्षे तृतीयायां भृगोर्दिने ॥